गीना देवी शोध संस्थान
द्वारा श्रीगंगानगर, राजस्थान से प्रसारित
साहित्य, शिक्षा, संस्कृति एवं शोध का अंतर्राष्ट्रीय मासिक
Impact Factor : 6.632
ISSN : 2321-8037
मार्च 2024
Volume 12, Issue 3

Gina Shodh SANGAM

Peer Reviewed & Refereed Research Journal
International Journal of Literature, Arts, Culture, Humanities and Social Sciences
UGC Valid Journal (The Gazette of India, Extraordinary Part III, Section 4, Dated July 2018)

संपादक : डॉ. रेखा सोनी
विशेषांक सम्पादक : निशिकांत पाण्डेय
प्रधान सम्पादक : डॉ. नरेश सिहाग एडवोकेट

		SUMIT KUMAR	241-243
46.	आर्थिक विकास में महिलाओं की भूमिका	डॉ. रणजीतकुमारतिवारी	244-249
47.	प्राचीनभारतीय खगोलशास्त्रीयानुचिन्तनम्	प्रा. सुषमा माधव रावनरांजे	250-254
48.	प्रेमचंदोत्तर हिंदी उपन्यासों में नारी चित्रण	रक्षित् गौड KR	255-258
49.	यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः	प्रा. डॉ. सत्येंद्र राऊत	259-262
50.	संस्कृत साहित्य में नारी	डॉ. दीपा कुमारी	263-267
51.	मधु कांकरिया के कहानी साहित्य में स्त्री विमर्श	डॉ. के. पद्मा रानी	268-271
52.	सावित्री रौंका की कहानियों में स्त्री बनाम समाज	डॉ. प्रकाश कृष्णदेव धुमाल	272-279
53.	समकालीन हिन्दी उपन्यासों में नारी विमर्श	শ্ৰী মালবিকা বৰুৱা	280-284
54.	প্ৰাচীন যুগত নাৰীৰ সামাজিক স্থিতি	स्वेता यादव	285-290
55.	ध्रुवस्वामिनी : स्त्री की विद्रोही चेतना		
56.	अचिन्त्यभेदाभेदवादानुसारं-मोक्षस्वरूपविवेचनम्	बुद्धदेव पुरकायस्थः डॉ. रणजीतकुमारतिवारी	291-296
57.	शाम्भवीगीतिकाव्ये छन्दसां प्रयोगनैपुण्यम्	निशिकान्तपाण्डेयः डॉ. रातुलबुजरबरूवा	297-306
58.	जंगल के जुगनू उपन्यास में नारी विमर्श	रघुनाथ विठ्ठल मोरे प्रो. डॉ. अनीता नेरे	307-312

संगम Impact Factor : 6.632
विशेषज्ञ समीक्षित पत्रिका A Peer Reviewed International Refereed Journal
गीना देवी शोध संस्थान द्वारा प्रकाशित साहित्य, शिक्षा, संस्कृति एवं शोध को समर्पित मासिक
Website : www.ginajournal.com
ISSN : 2321-8037
SANGAM
Vol. 12, Issue 3
पृष्ठ : 244-249

प्राचीनभारतीय खगोलशास्त्रीयानुचिन्तनम्

डॉ. रणजीतकुमारतिवारी
सर्वदर्शनविभागः, KBVS&ASU

राजनीतिकस्वतंत्रताप्राप्तेः बहुदशकानन्तरमपि उचितात्ममूल्यांकनन्यूनताकारणात् आत्मसम्मानाभावात् भारतीयाना विचार–प्रक्रियायां संस्कृतशिक्षणं प्रति पीड़ादायिका उदासीनता वर्तते। संस्कृतम् अस्माकं प्राचीनज्ञानभाण्डागारमिति तथा च व्यापकज्ञानाधारमिति ज्ञातुं विलम्बो जातः। भारतीयच्छात्राः प्रायशः न जानन्ति यत् सहस्त्र–सहस्त्रवर्षेभ्यः भारतीयप्रतिभा विज्ञानानुसन्धाने समग्रे विश्वे जगद्गुरुरूपेण विख्याता विद्यते। ज्ञानस्य विविधक्षेत्रेषु स्वीयाद्वितीयोपलब्धिकारणेन अन्तार्राष्ट्रियसमुदायेन भारतस्य प्रशंसा कृताऽस्ति।

अल्बर्टआइंस्टीनेनोक्तमस्ति– 'We owe a lot to the Indians, who taught us how to count, without which no worthwhile scientific discovery could have been made'. प्रो. एफ. मैक्समूलरेन (1823-1900), उक्तम्– 'Whatever sphere of human mind you may select for your study, whether it be language or religion or mythology or philosophy, whether it be laws or customs, primitive art or primitive science, everywhere you have to go to India, whether you like it or not, because some of the most valuable and instructive materials in the history of man are treasured up in India and India only. महानेतिहासकारस्य डॉ. विलडुरंटस्य मतमस्ति यत् 'This unbroken continuity of Indian culture and Sanskrit language are wonders of world history'. सत्यमेव भारतीयसंस्कृतिसंस्कृतयोः परस्परं निरंतरता विश्वेतिहासस्य कृते आश्चर्यमिति वर्तते।

संस्कृतवाङ्मये विज्ञानस्य विभिन्नशाखासंबद्धकार्याणि अवलोकनेन ज्ञायते यत् अध्ययनानुसंधानयो इयं परम्पराभारतवर्षे प्राचीनकालादेव सततप्रवाहमाना विद्यते।

महर्षिभृगु–वशिष्ठ–भारद्वाज–अत्रि–शौनक–शुक्र–नारद–चरक–कश्यप–अगस्त्य–परशुराम–द्रोणप्रभृतयः ऋषयः स्वकीयसम्पूर्णजीवनमेव वैमानिकी–सैन्यविज्ञान–नौकानिर्माण खगोलविज्ञान–ज्योतिष–रसायनविज्ञान–पदार्थविज्ञानादीनां क्षेत्रे अनुसन्धानकार्य एव व्यतीतवन्तः। वास्तुकलां परिभाषयितुंमहर्षिभृगुना भृगुसंहितायां यत् लिखितं तत्तुतस्य ज्ञानस्य विशालपरिधौसुखदाश्चर्ये समाहितं वर्तते। आधुनिकयुगे तस्य कल्पनोपि कठिना इति वक्तुं शक्यते। भृगुना दशशास्त्राणि उल्लेखितानि यथा – कृषि–जलविज्ञान–खनन–नौकायन–रथचालन–प्रक्षेपास्त्र विद्या–वास्तुशास्त्र(भवन–मंदिर–सार्वजनिकोद्यान– दुर्गनिर्माण–गृहनिर्माण)–प्रकरशास्त्र–नगरयोजना–यांत्रिक–अभियांत्रिकशास्त्राणीति। पुनश्च श्लोकेषु 32 विभिन्नप्रकारिकाः विद्याः तथा च 64 प्रकारिकाः कला उल्लेखिताः वर्तन्ते।